Chapter-8

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

# अष्टमं प्रकरणम्

## १.८.० वसिष्ठसंहितायाः संपादनस्य फलितमुपसंहारः

### १.८.१ उपसंहारः —

भारतीयज्योतिषशास्त्रमतिप्राचीनम्। वेद-वेदाङ्ग-उपनिषद्-पुराण-धर्मसाहित्यादि-ग्रन्थेषु ज्योतिषस्य विषया उपलभ्यन्ते। त्रिस्कन्धज्योतिषान्तर्गतानां संहिताशास्त्रविषयाणां विकासोऽथर्ववेदान्तरं विशेषरूपेणाभवत्। वेदाङ्गज्योतिषं प्रसिद्धमेव। व्यवहारिकक्षेत्रेषु संहितान्तर्गतविषयाणां स्थानमवश्यं प्रदेयं स्यात्। संहिताग्रन्थेषु बृहत्संहिता-नारदसंहिता-रावणसंहिता-भृगुसंहिता-वृद्धगर्गसंहिता-वृद्धवसिष्ठसंहिता-लोमशसंहिता-आदयो नैके ग्रन्था विविधसंहिताकारैः प्रणीता उपलभ्यन्ते। वसिष्ठसंहिता अपि प्राचीनः संहिताग्रन्थः। सर्वेषु संहिताग्रन्थेषु वृद्धवसिष्ठरचिताया वसिष्ठसंहिताया नाम प्रथममायाति। किन्त्वद्यावधि न केनापि संहिताया अस्या विशेरूपेणाध्ययनं विहितम्। अतो वसिष्ठसंहिताग्रन्थस्याध्ययनं तथा च संपादनकार्यस्य निश्चयो मया मद्गुरुवर्याणां प्रो.डॉ. मुकुन्द वाडेकरमहोदयानां प्रेरणया कृतः,तथा चायं मम प्रयत्नः संपादनेऽध्ययने च।

अतो कार्यार्थमहं वटोदरनगरस्थितं प्राच्यविद्यामन्दिरं गतवती । तत्र श्रीकृष्णदासात्मज-गङ्गाविष्णुना संपादिता तथा च लक्ष्मीवेंकटेश्वरमुद्रणालये शिवदुलारेवाजपेयीत्यनेन मुद्रयित्वा प्रकाशिता श्रीब्रह्मर्षिवृद्धवसिष्ठविरचिता वसिष्ठसंहिता मया मद्गुरुनिदेशादुपलब्धा। मया वाचस्पति-(पीएच. डी.) उपाधिकृते महाशोधप्रबन्धस्य विषयरूपेण वसिष्ठसंहितायाः समीक्षात्मकं संपादनं तुलनात्मकमध्ययनं च कर्तव्यमिति प्राच्यविद्यामंदिरस्य निदेशकैः प्रो. डॉ. मुकुंद वाडेकरैर्निर्दिष्टम्। ज्योतिषशास्त्रीयसंहिताग्रन्थाः प्रायेण दुर्लक्षिताः सन्ति। अत एव गुरोराज्ञानुसारं मयाध्ययनमारब्धम्।

तत्पश्चात् २००७ वर्षे नवेम्बरमासतो कार्यारम्भो मया कृत:। प्रथमं प्राच्यविद्यामंदिरहस्तलुखतविभाग उपलब्धानां हस्तलिखितानां–मातृकाणां संकलनमध्ययनं च प्रारब्धम्। प्राच्यविद्यामन्दिरे ब्रह्मर्षिवृद्धवसिष्ठरचिता बहव: सिद्धान्तग्रन्था वसिष्ठसिद्धान्त:(क्रमसंख्या १२११३, १३४२१, ३२९४), वसिष्ठसिद्धान्त:, भूगोलाध्याय:(क्रमसंख्या ३२९३) तथा वृद्धवसिष्ठसंहिता गणितस्कन्ध: (क्रमसंख्या ९३२५) इत्यादय: पञ्चसिद्धान्तग्रन्था: संप्राप्यन्ते। किन्तु एते हस्तलिखितग्रन्था: गणितस्कन्धान्तर्गतास्तथा चापूर्णा:। अत: केवलं तेषां समुल्लेख: कृत:। अन्ये त्रयो हस्तलिखितग्रन्था वसिष्ठसंहिता(व१) क्रमसंख्या ९३२०, वृद्धवसिष्ठसंहिता(व२) क्रमसंख्या ११२२ तथा महासंहिता(व३)क्रमसंख्या ११३६६ –एतेषां हस्तलखितग्रन्थानां सूक्ष्मातिसूक्ष्ममध्ययनं संतुलनां च कृत्वा पाठशुद्धीकरणं समुचितपाठनिर्धारणं पाठभेदानां टिप्पणीमध्ये निवेशनं–एतत्सर्वं मया शोधनिबन्धस्य द्वितीयविभागे प्रदर्शितम्।

मम कार्यं प्रचलति सति चौखम्बासंस्कृतभवनद्वारा प्रकाशितं डॉ. गिरिजाशंकरशास्त्रीद्वारा संपादितं वसिष्ठसंहितापुस्तकं समुपलब्धं मया । अस्य पुस्तकस्य तथा वेंकटेमुद्रणालयप्रकाशितस्य पुस्तकस्य च समुपयोग: सदसद्विवेकबुद्ध्या मया शोधप्रबंधे कृत:। द्वयोरपि संपादनं वैज्ञानिकं नास्ति। यतो हि तैराधारभूतसामग्र्या: हस्तलिखितग्रन्थानां वर्णनमेव न कृतम्। मूलपाठनिर्धारणे व्याकरणशास्त्रीयाश्छन्द:शास्त्रीयाश्च बहु प्रमादा: सन्ति। अनुवादेऽपि नैकवारमर्थज्ञानं विनैव यथाकथंचिद् लेखनं दरीदृश्यते। वसिष्ठसंहिताया: समग्रतया ४६ अध्यायानां हस्तलिखितग्रन्थानामाधारेण वैज्ञानिकरीत्या पाठनिर्धारणं, पाठभेदसामग्रीसहितं समीक्षात्मकं, अन्यप्रसिद्धसंहिताग्रन्थै: साकं सुसूक्ष्मं तुलनात्ममध्ययनं प्रथमवारमेव मया विहितमिति संशोधनस्य नावीन्यम्।

वसिष्ठसंहितायाः पाठो हस्तलिखितानामाधारेण संपादितः। तथापि संहिताग्रन्थस्यार्षत्वेन नैकस्थानेषु संपादितपाठे संधि-अभावः,संधिदोषः,व्याकरणस्यार्षप्रयोगा अनिवार्यत्वेन दरीदृश्यन्ते। यथा-

**१ संधि-अभावः -**

१ मैत्रादिऋक्षत्रितये(२.११), २ देवता ऋषिः (१८.४८), ३ संक्रान्तौ उपरागे (१९.१९), ४ च ऋक्षभवम् (१९.२४), ५ अयनादौ ऋतुः (२०.२), ६ च अष्टावेते(२९.३४), ७ दोषश्च उग्रसंज्ञकः(२९.५३), ८ वैनाशिकाख्याखिलऋक्षवृन्दम् (३०.२), ९ नाड्यश्चतस्त्रस्तिथिऋक्षयोगे (३२.१८), १० यज्ञवते ऋत्विजे (३२.१७२), ११ दस्रभादि-ऋक्षाण्यपि (३२.२०९), १२ पुत्रीविवाहोऽपि ऋतुत्रये (३२.२३७), १३ दिने ऋक्ष- (३३.५), १४ मन्त्रेण आयुः(३३.१६), १५ समिद्भिश्च आज्येन (३३.२६), १६ मन्त्रेण आद्य-(३४.१५), १७ देव उक्तवानस्य (३५.६), १८ वैनाशिकादिऋक्षेषु(३७.८३), १९ ते अन्यदित्यृचा(३७.१०३), २० गृहदाहे ऋतौ स्त्रियः (३७.११४), २१ विष्णु-ऋक्षे(३८.११), २२ साधकस्य ऋणं (३९.४६), २३ तस्माद्धनऋणान्यर्क्ष- (३९.४७), २४ गजरामाङ्कवस्वङ्कऋतुभिर्गुणितात्पदात् २५ धनाधिकं गृहं वृद्ध्यै निधनाय ऋणाधिकम् (३९.५०), २६ वैनाशिकादिऋक्षं(३९.५४), २७ भेदानि अधुना(३९.१४०), २८ प्रणवेनार्चयेद्वापि अथवा (३९.२१६), २९ च अष्टमी(४०.३५), ३० भौमाश्च उत्पाताः(४२.८७), ३१ वैधृतिश्च उपरागसमः (४२.९४), ३२ आस्तीकऋषि-(४२.१७३), ३३ प्रसिद्धा रुद्रसूक्तस्य ऋषिश्छन्दोऽधिदेवता –(४२.१४४), ३४ भद्राग्ने इति सूक्तस्य आद्यर्चौ द्वे जपोत्यकौ(४२.१४४), ३५ अथातः संप्रवक्ष्यामि उत्पाताध्यायमुत्तमम् (४५.१), ३६ ग्रहर्क्षजाः केतवश्च उत्पाता दिव्यसंज्ञकाः (४५.४),

३७ दद्याच्चतुर्विंशतिऋत्विजान्(४५.२६), ३८ संप्रवत्तेषु ऋतुषु शीतोष्णं तद्विपर्ययात् (४५.७३), ३९ आरायो भूप इत्याद्या (४५.१०६), ४० भक्त्या आचार्याय(४६.१५), ४१ बृहतीशो विधी ऋषि:(४६.३४), संधिदोष:- ४२ न विधेयो ऋतुत्रये (३२.२३५)।

**२ छन्दोदोषा अपि नैकवारं दृश्यन्ते। यथा-**

१ ब्रह्मधिष्ण्यत: (१४.९०), २ भृगु: षट्कसंस्थ:(३२.२१), ३ मूलाय स्वाहा प्रजापतये स्वाहेतत्युपहोममन्त्रौ । (४२.१५७), ४ महाबलवत्तरं शरम् (४३.११३), ५ पुरुषसूक्तस्य चोदिता:(४२.१४७), ६ ऋषिब्रह्मजं पितृजं(४५.३३), ७ तिलाज्यहोमव्याहृतिभि:(४६.१०)

**३ व्याकरणदोषा:—**

१ व्यतिपातविष्ट्याम्-(२४.३२), २ पूज्य (२५.२४), ३ लाभं (३०.६), ४ पूज्य (३२.१३७), ५ ग्राह्य-(३२.१७४), ६ विज्ञात्वा (३२.२२२), ७ हुनेत् (३४.१७), ८ वेष्ट्य (३५.१३), ९ स्नाप्य (३६.१०), १० प्रार्थ्य(३७.१०८), ११ पूर्य(३९.५), १२ स्थाप्य(३९.४५), १३ प्रविशेन्नवमन्दिरे(३९.२२२), १४ कृष्णाष्टमिव्रतं(४३.१४१), १५ वर्गे गुरोर्बुद्धिदया सुरेज्ये (४४.११), १६ पूज्य (४५.१०६,४५.१२३), १७ तुल्यस्थानानि कथ्यते (४५.१७३), १८ साधारणेन शान्त्यैव (४५.१७६), १९ कल्प्य (४६.३), २० स्नाप्य-(४६.५), २१ स्थाप्य(४६.८), २२ चन्दनोत्पलपुष्पाज्यगुग्गुलू च गुडप्रियौ (४६.१८), २३ मामितस्य च-(४६.२५)।

**४ वाक्यदोष : --**

वायुश्छन्द ऋषिरस्य गायत्री देवता स्वयम् (१८.८४)।

### ५ पाठसंशोधनम् --

कुत्रचित् पाठसंशोधनमप्यावश्यकमासीत्। यथा–

१ षोडश ब्राह्मणाञ्छुद्धान्दम्भानृत(वि)वर्जितान् (१८.३४)।

२ सर्वे(र्वं) त्वशुभलग्ने च (२३.४४)।

३ विचित्तमोघामप(पर)वैरिसंघा (२४.२०)।

४ प्रया(वा)सः शुभैः (३२.४२)।

५ लग्नादिसर्वे(र्वाः) खलु राशयश्च (३२.४७)।

६ शत्रुतो भीत्या(तिः) (४४.६)।

७ अनृतौ चेद्रोगभयमनृते (सन्नृतौ) भूभुजां वधः (४५.७३)।

८ पुरीषमन्दिरे गोष्ठे वृषचिकित्सारुजां(चिकित्सायां रुजा) भवेत् (४५.१७२)।

लक्ष्मीवेंकटेश्वरमुद्रणालयेन तथा चौखम्बासंस्कृतभवनद्वारा प्रकाशिताया वसिष्ठसंहिताया मया सूक्ष्मध्ययनं कृतं तस्य निष्कर्षरूपेण द्वयोरपि पाठदोषा निम्नदर्शितरूपेण प्रदर्शयितुं शक्यन्ते। छन्दोज्ञानाभावात् चतुःपादविभक्तस्य शार्दूलविक्रीडितस्याप्यनुष्टुप्सदृशं श्लोकद्वयेषु विभाजनं कथं सयुक्तिकमिति विद्वद्भिरेव विचारणीयम्।

### १.८.२ लक्ष्मीवेंकटेश्वरमुद्रणालयस्य पाठदोषाः ---

अ. १४ – नक्षत्रस्वरूपाध्याये(श्लो. ४०) श्लोकस्य प्रथमपादो दोषपूर्णः। पादत्रयं लिखितं वर्तते। तत्र प्रथमपादः ३८मध्येऽपि वर्तते, तस्य पुनरुक्तिर्दोषपूर्णा। अत्र– साधारणमिश्राख्यमिति नावश्यकम्।

अ.१५ – योगाध्याये(श्लो.१२) सोमयानं शब्दो दोषपूर्णः। सोमपानं युक्तम्।

अ.१८ – गोचरविचाराध्याये (श्लो. ८७) इलप्रियो शब्दस्योपयोग:। तत्र इन्द्रप्रियो–इति पाठो योग्यो भवेत्।

अ.१९ – संक्रान्त्यध्याये (श्लो. १५) अजघटसंक्रान्तिद्वयं इति पाठो न युक्त:, किन्तु अजतुलासंक्रान्तिद्वयं युक्तं स्यात्।

अ.१९ – संक्रान्त्यध्याये (श्लो. २१,२२) घटशब्दस्योपयोगो द्विवारमयुक्त:। तत्र झषशब्दप्रयोगो युक्त:।

अ. २३ – लग्नबलाध्याये (श्लो. १७) बाह्यस्तु – शब्दो न युक्त:। किन्तु ग्राह्यस्तु शब्दो योग्यो भवेत्।

अ.३२ – विवाहाध्याये (श्लो.१५) तिथिक्षणेषु – इति पाठो न युक्त:।
किन्तु तिथिक्षयेषु – इति युक्तं भवति।

अ.३२ – विवाहाध्याये (श्लो.१०३) मित्रादिमित्र–पदे मित्राधिमित्रपदं योग्यम्।

अ.३४ – अश्वारिष्टशान्त्याध्याये (श्लो.१३) गृह्यावधानत:–इति पाठो योग्यो नास्ति किन्तु गृह्यविधानत: योग्यम्।

अ. ३८ – गृहप्रवेशाध्याये (श्लो. २४) स्रवी शब्दोऽयोग्य:। तत्र स्रग्वी–इति शब्दो योग्य:।

अ.४१ – गुणनिरूपणाध्याये(श्लो. १९) कृत्तिकदितय: –इति अपपाठ:।
तत्र कृत्तिकादित्रय:–इति योग्यं भवेत्।

अ.४२ – दोषनिरूपणाध्याये (श्लो. ७३) बलवद्गणसम्पन्नो –इति प्रमादयुक्तम्,
तत्र बलवद्गुणसम्पन्नो –इति युक्तं स्यात्।

अ. ४३ – दोषनिरूपणाध्याये (श्लो.१४४) कालानलशब्दे दावानलशब्द: समर्पक:।

अ.४५ – उत्पाताध्याये (श्लो. ७६) पशुभि: पदं प्रमादपूर्णम् , तत्र पांशुभि:

पाठो युक्तः।

अ.४५ – उत्पाताध्याये (श्लो. १२६) तालोब्दा इति अपपाठः। तत्र तारोल्कापात इति युक्तम्।

अ.४५ – उत्पाताध्याये (श्लो. १३२) तुषारत्व– इति न योग्यम्। तत्र तुषारत्वं भवेत्।

**१.८.३ चौखम्बासंपादने प्रमादाः —-**

अ.३ – चन्द्रचाराध्याये(श्लो.५) सौम्योन्नते –इति अयोग्यः पाठः। तत्र याम्योन्नते योग्यं भवेत्।

अ.९ – राहुचाराध्याये (श्लो. २१) स विमर्दो –इति पाठः संदर्भदृष्ट्या न योग्यः। तत्र –अवमर्दो पाठः युक्तः। तथैव श्लो. २२ मध्ये स च मर्दो–स्थाने संदर्भदृष्ट्या स चामर्दो –पाठः सुयोग्यः।

अ.१०– केतुचाराध्याये (श्लो.१७) मध्ये सूर्यमण्डलदृष्टाः– इति पाठश्छन्दोभङ्गयुक्तः। तस्मादत्र सूर्यमण्डले दृष्टः– इति युक्तं भवेत्।

अ.११ – वर्षेशादिनिर्णयाध्याये(श्लो.२०) सस्यस्य चयम्– इति पाठोऽयोग्यः, सस्यभयम्– युक्तो भवति।

अ.११– वर्षेशादिनिर्णयाध्याये(श्लो.२४) मुञ्चति वारिधराः –इति पाठो व्याकरणदृष्ट्या न योग्यः। तत्र मुञ्चति वारिधरः– इति पाठो योग्यः।

अ.१२ – तिथिस्वरूपाध्याये (श्लो. ६०) श्लोकार्थो न युक्तः। चतुर्थी–इत्यस्य चतुर्दशी– अर्थो विहितः।गणेशपूजनं चतुर्थ्यामेव भवति,न चतुर्दश्याम्।

अ.१४ – नक्षत्रस्वरूपाध्याये (श्लो. ५) संग्रहोपनयनम् –स्थाने संग्रहोपयनम्—योग्यं भवेत्।

अ.१४ - नक्षत्रस्वरूपाध्याये (श्लो. ६७) श्लोकार्थोऽपूर्णो वर्तते।

अ.२९ - उपनयनाध्याये (श्लो.४९) स्फूर्जितसंज्ञका इति श्लोकार्थः न समर्पकः।

अ.२९ - उपनयनाध्याये (श्लो.५४) रोगमधनं, निर्धनं -इति श्लोकार्थो न युक्तः।

अ. ३९ - वास्त्वध्याये(श्लो. १) ग्रामसप्तपुरादीनां-इति पाठः न युक्तो भवेत्। ग्रामसद्मपुरादीनां -इति पाठो योग्यो भवेत्।

अ.३९ वास्त्वध्याये (श्लो. २०९) हिरण्यरेताः शब्दस्यार्थो ब्रह्मा - इत्ययुक्तो भवेत्। यतो हि हिरण्यरेता अग्निर्भवति। न ब्रह्मा। ब्रह्मण; स्थानं मध्यभागे निश्चितम्।

अ.४१ - गुणनिरूपणाध्याये(श्लो.१९) कृत्तिकादित्रयः- इति पाठस्यानुवादे नक्षत्रत्रयाणां गणना न कृता। केवलं कृत्तिकानक्षत्रं गृहीतम्। तन्न युक्तं प्रतिभाति। तथैव भाग्यनिलाख्यापद्यस्य पूर्वाफाल्गुनी, पूर्वाषाढा- इति नक्षत्रद्वयमयुक्तं स्यात्। अनिलस्यार्थः स्वातीनक्षत्रं भवति,न तु पूर्वाषाढा।

अ. ४२ - दोषनिरूपणाध्याये (श्लो. ७३) बलवद्गणसम्पन्नो- इति अपपाठो गृहीतः। किन्त्वनुवादः बलवद्गुणसम्पन्नो- इत्यस्य कृतः। कथमिदं युक्तं स्यात्?

अ. ४२ - दोषनिरूपणाध्याये (श्लो. ७९) श्लोकस्यार्थो न युक्तः। श्लोकोक्तस्य सप्तमीशब्दस्यार्थ एव न कृतः।

अ. ४२ - दोषनिरूपणाध्याये (श्लो. १०६) श्लोकस्यार्थो न युक्तः। सितारिस्थः- इत्यस्यार्थः शुद्धिः सप्तमस्थानगः-इत्ययुक्तम्। अरिशब्देन षष्ठस्थानं भवति।

**१.८.४ व्याकरणछन्दःप्रमादाः ---**

अ.२- अर्कचाराध्याये(श्लो.२५) - रक्तः सूर्यः शरदि विपुला कीर्तिसौभाग्यदश्च -इत्यत्र व्याकरणदोषो दृश्यते। विपुल-इति सामासिके शब्दे छन्दोभङ्गः।

वेंकटेश्वरस्य चौखम्बायाः संस्करणे विपुलाकीर्तिसौभाग्यदश्च इति पाठोऽपि प्रमादपूर्णः, अकीर्तिरित्यर्थानुसंधानात्।

अ.१२- तिथिस्वरूपाध्याये (श्लो.२) नूनं च एते- इत्यत्र संध्यभावः छान्दसः।

अ.१२- तिथिस्वरूपाध्याये(श्लो.२७) शीर्षाकपालान्त्राणि –इत्यत्र सप्त अक्षराणि। अतश्छन्दोदोषः।

अ.१२- तिथिस्वरूपाध्याये(श्लो.६७) –तत्र उपोषित्वा–इत्यत्र सन्ध्यभावश्छान्दसः।

अ.१३- वारस्वरूपाध्याये(श्लो.१)–धान्योर्णकोष्ट्रादि रवौ- इत्यत्र विभक्तिलोपश्छान्दसः।

अ.१४ - नक्षत्रस्वरूपाध्याये(श्लो.५०) स्वातीशब्दः स्वाति इति ह्रस्वः व्याकरणशास्त्रदृष्ट्या योग्यः, किन्तु संदर्भे न समर्पकः। छन्दःकारणाद् ह्रस्वो योग्यः।

अ.१८ - गोचरविचाराध्याये(श्लो.१३३) व्याकरणदृष्ट्या पूर्णाहुतिं समाचरेत् इति समीचीनं भवेत् । किन्तु तेन छन्दोभङ्गो भवति।

## १.८.५ द्वयोरपि छन्दोदोषाः —

अ.१० - केतुचाराध्याये(श्लो.३ तथा ५०) श्लोकस्य पादत्रयं गृहीतम्। छन्दोज्ञानाभावात् संपादने दोषः।

अ.१३ - वारस्वरूपाध्याये(श्लो.१०) दुष्यं शब्दो व्याकरणदृष्ट्या दूष्यम् –इति योग्यो भवेत्।

अ.१६ - करणाध्याये(श्लो. १६) श्लोकः शार्दूलविक्रीडितच्छन्दसि वर्तते। तथापि चरणद्वयमेव वर्तते। चरणद्वयानामभावः।

अ.१९ - संक्रान्त्यध्याये(श्लो.१६) श्लो. आर्याछंदसि वर्तते। तथापि तस्य चरणत्रयं वर्तते-इति विचारार्हम्।

अ.२३ - लग्नबलाध्याये (श्लो. ४१) धरणिशब्दः ह्रस्वः प्रयुक्तः।

अ. २९ - उपनयनाधयाये(श्लो. ३१) व्याकरणदृष्ट्या शस्तं पदं योग्यं भवेत्। न तु केवलं शस्त- इति- अपदम्।

अ. २९ - उपनयनाधयाये(श्लो. ३२) व्याकरणदृष्ट्या द्वितीयायं तथा तिथी -इति पदसमूहद्वयमयुक्तम्।

अ. २९ - उपनयनाध्याये(श्लो. ३३) श्लोकस्य पादत्रयं छन्दोदृष्ट्या न युक्तम्।

अ.३२ - विवाहाध्याये(श्लो. २२२) चौ.अनुसारं विर्ज्ञात्वा तथा वे. अनुसारं विज्ञात्वा इति पदं प्रमादपूर्णम्। विज्ञाय योग्यं स्यात्।

अ.४३ - गुणदोषापवादाध्याये(श्लो. ६) साधुशब्दो व्याकरणदृष्ट्या दोषपूर्णः। साधुं इति समीचीनं स्यात्।

अ.४३ - गुणदोषापवादाध्याये(श्लो. ४) आधिशब्दः नपुंसकरूपेण व्याकरणदृष्ट्या प्रमादयुक्तः। तत्र आधिः- इति भवेत्।

## १.८.६ मम शोधनिबन्धस्त्रिषु विभागेषु विभाजितो वर्तते।

प्रथमविभागे -
१) ज्योतिषशास्त्रस्य व्याख्या, प्रयोजनं, व्याप्तिश्च।
२) प्राचीनग्रन्थेषु वर्णितः वसिष्ठस्य वर्णनम्।
३) वसिष्ठसंहितायाः सामान्यपरिचयः।
४) वसिष्ठसंहितायां धर्मशास्त्रविचाराः
५) वसिष्ठसंहितायां ज्योतिषविचाराः।

६) वसिष्ठसंहितायां वास्तुविचाराः

७) वसिष्ठसंहितायाः संहितान्तरैः साकं तुलना

द्वितीयविभागे – पाठभेदसहितस्य सम्पूर्णस्य ४६ अध्यायान्तर्गतः संपादितवसिष्ठसंहितापाठः।

तृतीयविभागे – परिशिष्टानि वर्तन्ते।

१) अकारादिक्रमेण श्लोकसूचिः।

२) भौगोलिकशब्दानां सूचिः।

३) वैदिकमन्त्राणां सूचिः

४) अन्यग्रन्थेषु वसिष्ठवचनानि

५) संदर्भग्रन्थसूचिः।

**प्रथमविभागे –**

१) ज्योतिषशास्त्रस्य व्याख्या, प्रयोजनं, व्याप्तिश्च ।

अस्मिन्प्रकरणे ज्योतिषशब्दस्य व्याकरणशास्त्रीयं स्पष्टीकरणं कृत्वा तस्य विविधत्वं प्रदर्शितम्। सिद्धान्त–संहिता–होरा –इति त्रिषु स्कन्धेषु विभक्तस्य ज्योतिषशास्त्रस्य विचारा वेद–वेदाङ्ग–महाभारत–पुराण–स्मृतिग्रन्थेषु सर्वत्र परिलक्ष्यन्ते। प्राचीनकाले यज्ञयागादीनां समयनिर्धारणार्थं तथा चाधुनिककालेऽपि योग्यमुहूर्तनिर्णयार्थं ज्योतिषशास्त्रस्यावश्यकता। फलज्योतिषं जीवने मार्गदर्शकरूपेण वर्तते,अतस्तस्य महत्ता प्रतिपादिता।

२) प्राचीनग्रन्थेषु वर्णितं वसिष्ठस्य वर्णनम्।

वस्धातोरुत्पन्नो वसिष्ठशब्दः श्रेष्ठत्वं सूचयति। वसिष्ठनाम्नो विदुष ऋषेः परम्परा प्राचीनकालादेव समागता प्रतिभाति। एवमेव वैदिककालत वराहमिहिराचार्यकालपर्यन्तं बहवो वसिष्ठवंशीया ऋषयः संजाताः। वसिष्ठपदप्रयोगे द्वौ भेदौ दृश्येते। कुत्रचिद् वसिष्ठशब्दस्य प्रयोगः कुत्रचिद् वृद्धवसिष्ठशब्दस्य प्रयोगो दरीदृश्यते। अतो वृद्धवसिष्ठ एव वसिष्ठ इति वक्तुं शक्यते। किन्तु तस्य समयविषये निर्धारणं निश्चयेन कर्तुं न शक्यते। भट्टोत्पलस्य बृहत्संहिताटीकायां वसिष्ठसंहिताश्लोकाः संप्राप्यन्ते। तस्य कालः ख्रि. ९६६ (शके ८८८) । अतः तत्पूर्वं वसिष्ठस्य काल इति वक्तुं शक्यते। वराहमिहिरस्योपरि वसिष्ठस्य प्रभावो स्पष्टतया दृष्टुं शक्यते। तस्य कालः ख्रि. ५०५ अस्ति। अतः तत्पूर्वं वसिष्ठस्य काल इति वक्तुं शक्यते।

३) वसिष्ठसंहिताया सामान्यपरिचयः।

ब्रह्मर्षिश्रीवृद्धवसिष्ठविरचिते वसिष्ठसंहिताग्रन्थे ४६ अध्यायाः(२,७१९ श्लोकाः) सम्मिलिताः सन्ति, यद्ग्रन्थे, सिद्धान्तविभागे सूर्यादीनां ग्रहाणां चारविषय उक्तम्। पञ्चाङ्गे तिथि-वार-नक्षत्र-योग-करणादीनां व्यवहारेषु किं महत्त्वमिति स्पष्टीकृत्य विस्तृतं विवरणं निर्दिष्टमस्ति। धर्मशास्त्रविभागे मनुष्यस्य जीवने गर्भाधानादिविविधसंस्काराणां महत्त्वं तस्य कालविवरणं कृतम्। वास्त्वध्यायविभागे ग्रामसप्तपुरादीनां निर्माणे सविस्तरं विवेचनं ग्रन्थस्य वैशिष्ट्यमस्ति। तदन्तरं यात्राध्याय-राजाभिषेकाध्याय-वस्त्रपरिधानाध्याय-उत्पाताध्याय-गुणदोषनिरूपणाध्याय-विविधशान्त्यादीनां विवेचनमस्ति। अथ वसिष्ठसंहिताग्रन्थ अतिप्राचीनः। किन्तु तद्विषय अधिकांशजना न जानन्ति। तस्याधिकं प्रचलनं नास्ति।

४) वसिष्ठसंहिताया धर्मशास्त्रविचारः

धर्मशास्त्रविभाग आधानाध्यायतो विवाहाध्यायपर्यन्तं संस्काराणां निरूपणं कृतमस्ति। तत्र विवाहाध्यायेऽष्टादशकूटानां महत्त्वं प्रदर्शितम्. यत् तस्य वैशिष्ट्यमस्ति। राजाभिषेकाध्याये

नृपाणामभिषेकः कस्मिन् काल इष्ट इति विस्तृतरूपेण स्पष्टीकृतम्। यात्राध्याये फलसिद्धिप्राप्त्यर्थं निखिलगुणयुतस्य राज्ञो यात्राया विधानं कथितम्। कथिततिथि-वार-नक्षत्रयोगेषु यात्राप्रयाणमभीष्टफलदं स्यात्। विविधप्रकरणेषु ग्रहणशान्तिः, रोगोत्पत्तिशान्तिः- अश्व-गजारिष्टशान्तिश्च दोषशमनार्थे प्रकाशिता। उत्पाताध्यायेऽन्यत्वं प्रकृतेरुत्पातसंज्ञकम् - इति प्रतिपाद्याधर्मत्वादसत्याच्च नास्तिक्यादतिलोभतोऽनाचारान् नृणां नित्यमुपसर्गाः प्रजायन्ते। एते दिव्यान्तरिक्षक्षितिजविकारास्त्रिविधोत्पाताः शोकदुःखदा जायन्ते। यस्य जन्मनक्षत्रे सूर्यचन्द्रयोर्ग्रहणं भवेत्, स व्याधिभयं धनक्षयादिरशुभफलं प्राप्नोति। अतो द्रव्यमन्त्रविधानेन तस्य दोषापनुत्तये सम्यक् शान्तिं कुर्यात्। गजाश्वरिष्टाध्याये यस्य राज्ञो गजाः, अश्वाः सन्ति तदधीनाखिला धरा, एवं स रणे विजयी तथा श्रीमान् भवेत्। अतस्तेषां रक्षणमभिवृद्धये शान्तिं कुर्यात्। सूर्यस्य राशौ संक्रमणे शुभाशुभसंक्रान्तिफलानि वर्णितानि।

५) वसिष्ठसंहिताया ज्योतिषविचारः।

विभागेऽत्र सूर्यादीनां नवग्रहाणां चारविषये सविस्तरमुक्तम्। वर्षेशादिनिर्णयाध्याये सूर्यादीनां ग्रहाणां वर्षेशादिनिर्णयपरत्वेन शुभाशुभफलं कथितम्। पञ्चाङ्गे तिथि-वार-नक्षत्र-योग-करणादीनां महत्त्वं प्रदर्शितम्। गोचराध्याये सूर्यादीनां ग्रहाणां गोचरवशात् शुभाशुभफलं शान्तिश्च वर्णिता। शुभाशुभं चन्द्रताराबलं चन्द्रताराबलाध्याये कथितम्। उपग्रहाध्याये उपग्रहादिदोषाणां विवाहादिकार्ये विचारः करणीय इति निर्णीतम्। ग्रहकूटाध्याये समस्तप्राणिनां शुभाशुभफलं तथा लग्नबलाध्याये लग्नबलाबलविचारः कृतः। गुणदोषापवादाध्याये(अ.४१,४२,४३) तिथिवारनक्षत्रयोगेन संजातानां विविधयोगानां, तेषां शुभाशुभफलं च विवर्णितम्। अशुभफलनिवारणार्थं, दोषापनुत्तये च शान्तिस्तथा च दोषानामपवादः कथितः। विविधयोगेषु जातान् गुणांश्च, दोषांश्च, गुणापवादान् दोषापवादांश्च सम्यग्विचिन्त्य गुणाधिकमल्पदोषं स्वीकुर्यात्।

वसिष्ठस्य विविधविषयोपरि विचारा नैकेषु ज्योतिष–वास्तु–मुहूर्तग्रन्थेषूद्धृताः श्लोकरूपेण संप्राप्यन्ते। तेषां संग्रहो मया कृतः। संग्रहेणेदं निश्चितं तदस्याः संहिताया महत्त्वं ज्योतिषशास्त्रग्रन्थकाराणां दृष्ट्यातीवास्ति। यथा बृहत्संहिता–व्यवहारप्रदीपः–वास्तुमण्डनम्–वास्तुरत्नावली–वास्तुरत्नाकरः–वास्तुराजवल्लभः – वास्तुसौख्यम् –कालमाधवः–मुहूर्तचिन्तामणि–मुहूर्तमार्तण्ड–बालबोधज्योतिषसारसंग्रहः–इत्यादयः । एतेन वसिष्ठस्य महत्त्वं सिद्धं भवति।

वसिष्ठस्य ज्योतिषसंहितायाः सूक्ष्मरीत्या तौलनिकं चाध्ययनमद्यावधि केनापि न कृतं तत्राहं मम प्रयत्नं कृतवती। एवं ममाध्ययनं तौलनिकं समीक्षात्मकं परिपूर्णं च स्यादिति मया प्रयत्नो विहितः। अस्य ग्रन्थस्य आंग्लभाषायां, गुर्जरभाषायां चानुवादो नोपलभ्यते। हिन्दीभाषायामुपलब्धोऽनुवादोऽपि न परिपूर्णः समीचीनश्चेति मम मतम्। हस्तलिखितग्रन्थानामाधारेण पुनः संपादने वैज्ञानिकपद्धत्या मया प्रयत्नः कृतः। अन्यासु भाषास्वस्यानुवादकार्ये भविष्यत्काले प्रयत्नं कर्तुं मम निर्धारः।